# पाठ-७
# एतद् उपास्यम्

**सारान्शः**

वेदान् पाठयित्वा आचार्यः अन्तेवासिने शिष्याय जीवने हितकरान् उपदेशान् प्रयच्छति । जीवने सदा धर्मस्य मार्गे चलितव्यम् । आचार्याय तस्य प्रियं धनम् (सत्कर्मणा उपार्जितम्) / शिष्यं वा आहृत्य सन्तानपरम्परा पालनीया । धनार्जनात् अध्ययनात्, अध्यापनात्, देवपितृकार्याभ्याम् च आलस्यं न कर्तव्यम् । मातरं पितरम् आचार्यम् अतिथिं च देवता इव मन्यस्व अस्माकं सदाचरणानि एव अनुसरयानि । समाजे अस्मदपि श्रेष्ठाः ये विद्वांसः सन्ति ते आसनादिप्रदानेन सदा सम्माननीयाः ।दानविषये आचार्यः शिष्यं शिक्षयति यत् दानं सदा श्रद्धया, सम्मानेन, भयेन, लज्जया, सद्भावनया च देयम्। यदि कर्मणि आचरणविषये वा संशयः स्यात् तदा विवेकशीलानां विदुषाम् आचरणम् अनुकरणीयम् । एतत् एव वेदानां रहस्यम् । एतदेव अनुशासनम् ।

**मुख्य बिन्दवः**

प्रसिद्धेषु उपनिषद्ग्रन्थेषु तैत्तिरीयोपनिषद् एका प्रसिद्धा उपनिषद् अस्ति ।'उपनिषद्' इति शब्दस्य व्युत्पत्तिः एवम् अस्ति- 'उप + नि सद् गत्यवसानेषु । अर्थात् सा विद्या या सांसारिकप्रपंचान् नाशयति यस्याः माध्यमेन ज्ञानस्य उपलब्धिः भवति सा विद्या एव उपनिषत्सु वर्तते । सद् धातोः अर्थः स्था तिष्ठ् अपि भवति । अतः यदा शिष्यः गुरोः समीपं विनयीभूत्वा श्रद्धया तिष्ठति तदा गुरुः ब्रह्मविषये यत्किंचित् उपदिशति तत् ज्ञानं रहस्यं वा उपनिषद् कथ्यते ।शंकराचार्येण कथितम् यत् इमां ब्रह्मविद्याम् उपनयन्ति आत्मभावेन श्रद्धाभक्तिपुरस्सर सन्तः इति उपनिषद् |उपनिषदां संख्या असीमिता किन्तु ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य, तैत्तिरीय, ऐतरेय, छान्दोग्य, बृहदारण्यक, श्वेताश्वतर इति एकादश-उपनिषदां एव विशिष्टं महत्त्वं वर्तते।भारतीयतत्त्वज्ञानस्य धर्मसिद्धान्तस्य च मूलाधाररूपेण उपनिषद्ग्रंथाः एव वर्तन्ते । भारतीयसंस्कृत्याः उपनिषदां च परस्परम् घनिष्ठः सम्बन्धः अस्ति । विदेशेषु अपि उपनिषदां प्रशंसकाः सन्ति सप्तदशे शतके दाराशिकोहमहोदयेन, नवदशे शतके जर्मनस्य शोपेनहावरमहोदयेन महाकविगेटे-महोदयेन च उपनिषदां महती प्रशंसा कृता ।

**अवगच्छामः**

प्राचीन काले भारतीयसंस्कृतौ मानवानां कृते चत्वारः आश्रमाः स्वीकृताः। ते च ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाः इति । ब्रह्मचर्याश्रमे छात्राः गुरुकुले स्थित्वा विद्याग्रहणं कुर्वन्ति स्म । वेद-वेदांगानि पाठयित्वा आचार्यः अध्ययनस्य समाप्तौ शिष्यान् उपदिशति स्म । ते एव उपदेशाः अद्यत्वे अपि दीक्षान्तभाषणरूपेण प्रसिद्धाः सन्ति । वेदानां रहस्यं साररूपेण उपनिषत्सु उपलभ्यते। वस्तुतः वैदिकसाहित्यस्य अन्तिमं स्वरूपम् उपनिषद्रूपेण सुरक्षितम् । यत् ज्ञानं शिष्यः गुरोः समीपम् उपविश्य प्राप्नोति तत् एव उपनिषद्।

**आवश्यकोऽयं ज्ञानम्**

- यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
  न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ||
- माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा ।
- अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
  अश्वमेधसहस्राद् हि सत्यमेव विशिष्यते ।।
- सत्येव जयते नानृतम् ।
- अध्येतव्या त्रयी नित्यं, भवितव्यं विपश्चिता ।
- आतिथेयं परं तीर्थम् ।
- धर्मो रक्षति रक्षितः ।
- यतोऽभ्युदयनिःश्रेयसिद्धिः स धर्मः ।
- किं कर्म किमकर्मेति कवयोऽप्यत्रमोहिताः

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

**ल्यप्**- धातोः पूर्वम् उपसर्गकारणात् क्त्वा स्थाने ल्यप् प्रत्ययः भवति ।

आहृत्य = आ + हृ + ल्यप् (अव्ययम्)

**उपसर्गाः-** संस्कृतव्याकरणे 22 उपसर्गाः सन्ति । उपसर्गाः धातोः प्रारम्भे प्रयुक्ताः तस्य अर्थे परिवर्तनं कुर्वन्ति तथा अस्मिन् पाठे प्र + श्वस्→ प्रश्वासः = श्रमापनयः, उप + आस् = उपास् - पूजार्थकं भवति । प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अध अपि अति सु उत् अभि प्रति परि उप- एते प्रादयः ।

**"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।**
**प्रहाराहार-संहार-विहार-परिहारवत्।।"**

उपसर्गों का प्रयोग करने से प्रायः मूल शब्दों का अर्थ बदल जाता है |**यथा –** हार शब्द का अर्थ है– 'माला', परन्तु जब उसमें 'प्र' उपसर्ग लगता है तो शब्द बनता है 'प्रहार' और उसका अर्थ होता है- मारना। इसी प्रकार 'आ' उपसर्ग लगने पर 'आहार' बनता है, जिसका अर्थ है भोजन। इसी प्रकार यदि 'हार' शब्द में 'सम' उपसर्ग जुड़ता है तो 'संहार' शब्द बनता है जिसका अर्थ है नष्ट करना, परन्तु इसी शब्द में 'वि' उपसर्ग लगने पर 'विहार' शब्द बनता है जिसका अर्थ होता है घूमना-फिरना। इसी तरह 'परि' उपसर्ग जुड़कर 'परिहार' शब्द बनता है जिसका अर्थ होता है– सुधार करना / त्याग करना ।

**नञ् तत्पुरुष-** अभावस्यअर्थे नञ् तत्पुरुष समासस्य प्रयोगः क्रियते।

नञ् समासः 15

तत्पुरुष का भेद नञ् समास है ।
जब निषेधार्थ बोध के लिए न, अन, अ पद का प्रयोग होता है तो वहां नञ् समास होता है। इसमें पूर्ववर्ण यदि व्यञ्जन होता है तो अ तथा स्वर हो तो अन का प्रयोग होता है। कदाचित् न का भी प्रयोग होता है।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| न शान्तिः | अशान्तिः | न समर्थः | असमर्थः |
| न शक्तम् | अशक्तम् | न लौकिकम् | अलौकिकम् |
| न आगतः | अनागतः | न आदिः | अनादिः |
| न अन्तः | अनन्तः | न ईश्वरः | अनीश्वरः |
| न आकृतिः | अनाकृतिः | न एकधा | अनेकधा |

**शब्दार्थाः**

**स्वाध्यायप्रवचनाभ्याम्** = अध्ययन और अध्यापन से
**अनूच्य**=पढ़ाकर
**नो इतराणि** = इनसे विपरीत का नहीं
**अस्मच्छ्रेयास** = जो हमसे श्रेष्ठ विद्वान हैं
**प्रश्वसितव्यम्** = उनकी थकान दूर करनी चाहिए
**भिया देयम्** = भय मानते हुए देना चाहिए
**अनुशासनम्** =नियमानुकूल आचरण,

**योग्यतां वर्धयत**

तैत्तिरीयोपनिषत् प्रसिद्धासु दशसु उपनिषत्सु अन्यतमा । इयं कृष्णयजुर्वेदीयतैत्तिरीयशाखान्तर्गता । इयम् उपनिषत् वल्लीत्रयेण विभक्ता विद्यते । प्रथमा वल्ली वर्णोच्चारविषयकः इत्यतः शिक्षावल्ली इति निर्दिश्यते । द्वितीयायां वल्ल्याम् आनन्दस्य मीमांसा विद्यते इत्यतः ब्रह्मानन्दवल्ली इति निर्दिश्यते । तृतीयायां वल्ल्यां वरुणस्य पुत्रः भृगुः प्रश्नोत्तरैः तपसा ब्रह्मज्ञानं प्राप्तवान् इत्यतः भृगुवल्ली इति निर्दिश्यते ।

**पाठ संप्रेष्यः**

1. सत्यमेव जीवनस्य आधारशिला
2. धर्मात्, कुशलात्, भूत्यै स्वाध्यायप्रवचनाभ्यां देवपितृकार्याभ्यां न प्रमदितव्यम् ।
3. माता, पिता, आचार्यः, अतिथिः च देवतुल्याः सन्ति ।
4. श्रेयांसः विद्वांसः एव सम्माननीयाः
5. यदि कर्मणि आचरणे वा संशयः स्यात् तर्हि सम्मर्शिणां विदुषां समीपे गन्तव्यम् ।
6. आचार्यस्य उपदेशाः उपासितव्याः
7. अभावस्य योगे नञ् तत्पुरुषस्य प्रयोगः भवति ।
8. तव्यत्, यत्, ल्यप् प्रत्ययानां धातुषु प्रयोगः ।
9. यत्र तत्र, यदा तदा, यथा तथा, यावत् तावत्, युग्म अव्ययानां वाक्येषु प्रयोगः भवति ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत्**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- अध्यायस्य समनार्थी पद्य सूक्तयः अपि जानीयात्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- उपनिषदस्य भावं स्व जीवने अन्वेषणं कुरुत।